विद्युद्दूतः

vidyud-dūtaḥ

क्रमाङ्कः पञ्चमः

Issue: Fifth

वसुधैव कुटुम्बकम्
INTERNATIONAL ASSOCIATION OF SANSKRIT STUDIES
अन्ताराष्ट्रियसंस्कृताध्ययनसमवायः

१/४/२०१३

1/4/2013

*अनूचानकुटुम्बकम्*

जनकपुरीतो राधावल्लभवंशीध्वनिं मधुरमधुरम् ।
प्रेम्णा शृणु च श्रावय विद्युद्दूत नचिराज्जगति निखिले ।।१।।
“यो ’नूचानः स महान् ” “वसुधा कृत्स्ना कुटुम्बकं ” चेति ।
सङ्गीतद्वयमेतद् गायति सततं जनकनगरी ।।२।।
वर्गो ’नूचानानां समेधतां भुवि मनीषिणां महताम् ।
शास्त्रार्थेषु रमन्तां नतरां शस्त्रेषु मनुजगणाः ।।३।।
सौहार्दमयं विश्वं भूयादखिलं क्षमादयामहितम् ।
गगनकुसुमायितः स्ताद् द्वेषो मानवकुले निखिले ।।४।।
सम्मिलिताः सर्वे वयमिह भूमितले भवेम न विभक्ताः ।
व्याकरणे ’स्तु विभक्तिर्नैव समाजे न वा ’पि राष्ट्रेषु ।।५।।
स्वस्थाः स्वरूपसंस्था भवेम सर्वे न जात्वतिस्वार्थाः ।
सुखिनः समं समृद्धा भवेम शान्ताश्च निर्द्वन्द्वाः ।।६।।

इति विदुषाम् आश्रवः

रामकरणशर्मा

---

विद्युद्दूतस्य पञ्चमाङ्कः समाप्तः

---